# संस्कृत-वार्ता:

दिनाङ्क : 27/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारतं यूरोपीयसङ्घं च ऐतिहासिकं मुक्तव्यापारसमन्वयं निश्चितं कृतवन्तौ। प्रधानमन्त्रिणा श्रीमोदिना, यूरोपीय-आयोगस्य अध्यक्षया उर्सुला फॉन डेर लायन इत्यनया च सर्व-व्यवहाराणां जननी इति उक्त्वा सन्धिं प्रशंसितवन्तौ।
- भारत-यूरोपीय-सङ्घयोः मध्ये व्यापार- सुरक्षा-रक्षा-सहभागिता, गतिशीलता-आपत्-संकट-प्रबंधन, हरित-हाइड्रोजन् इत्येतेषां च क्षेत्राणां सप्तसन्धिपत्राणां आदानप्रदानम् अभवत्।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना दक्षिणवर्तिनि गोवाराज्ये आयोजितस्य षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारत-ऊर्जा-सप्ताहस्य उद्घाटनं विहितम्।
- नवदिल्ल्याः संसदभवन-परिसरे संसदः आयव्यय-सत्रात् पूर्वं रक्षामन्त्रिण: राजनाथसिंहस्य अध्यक्षतायां सर्वदलीय-सभा प्रचलति।
- भारतेन अद्य संयुक्तराष्ट्रसङ्घे उक्तं यत् भारतस्य आन्तरिक-जम्मू-कश्मीरस्य विषये टिप्पणीं कर्तुं इस्लामाबादस्य अधिकारो नास्ति इति।

----------------------------------------------

<u>भारत-यूरोपीयसङ्घ-वार्ता</u>

भारतं यूरोपीयसङ्घं च ऐतिहासिकं मुक्तव्यापारसमन्वयं निश्चितं कृतवन्तौ। नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी, यूरोपीयपरिषदः अध्यक्षः एन्टोनियो कोस्टा इत्येषः यूरोपीय-आयोगस्य अध्यक्षा उर्सुला फॉन डेर लायन इत्येषा प्रतिनिधिस्तरीय-वार्तायाः अनन्तरं सन्धिपत्रेषु हस्ताक्षराणि कृतवन्तः। भारत-यूरोपीय-सङ्घयोःमध्ये व्यापार- सुरक्षा-रक्षा-सहभागिता, गतिशीलता-आपत्-संकट-प्रबंधन, हरित-हाइड्रोजन् इत्येतेषां च क्षेत्राणां सप्तसन्धिपत्राणां आदानप्रदानम् अभवत्। प्रधानमन्त्रिणा श्रीमोदिना, यूरोपीय-आयोगस्य

अध्यक्षया उर्सुला फॉन डेर लायन इत्यनया च सर्व-व्यवहाराणां जननी इति उक्त्वा सन्धिं प्रशंसितवन्तौ। अस्मिन् अवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, भारत-यूरोपीयसङ्घयोः सम्बन्धः सुदृढः अभवत्, तेषां सम्बन्धः नूतनम् औन्नत्यं प्राप्नोत्। सः अवदत् यत्, एषा न केवलं व्यापार-सन्धिः, अपितु सहभागी-समृद्धेः नूतनः प्रारूपः अस्ति।

प्रधानमन्त्री अवदत् यत्, भारतं अद्य सप्तविंशति-राष्ट्राणां यूरोपीयसङ्घेन सह बृहत्तमं मुक्तव्यापार-सन्धिं कृतवान् इति। सः अवदत् यत् एतेन निवेशानां वृद्धिः भविष्यति, वैश्विकस्तरे आपूर्तिशृङ्खलाः सुदृढाः भविष्यन्ति च।

एफ़. टि. ए. इत्यस्य समापनानन्तरं यूरोपीयपरिषदः अध्यक्षः एन्टोनियो कोस्टा, एफ़. टि. ए. इत्यस्य हस्ताक्षरं ऐतिहासिकं क्षणम् इत्यवोचत्। सः अवदत् यत् यूरोपीयसङ्घः, भारतं च नूतनं अध्यायं प्रारब्धवन्तौ। सः अवदत् यत्, यूरोपीयसङ्घः, भारतं च संयुक्त-समृद्धेः सुरक्षायाः च कृते मिलित्वा कार्यं करिष्यतः। अस्मिन् अवसरे सम्बोधयन्ती उर्सुला फॉन डेर लायन इत्येषा प्रधानमन्त्रिणं नरेन्द्रमोदिनं असाधारण-आतिथ्याय धन्यवादं प्रदत्तवती। सा अवोचत् यत्, गणतन्त्रदिवसस्य पथ सञ्चलने मुख्यातिथि: रूपेण भागग्रहणं सम्मानप्रदः अस्ति। सा अवोचत् यत्, भारतम् अग्रे सरति एतत् दृष्टवा यूरोपवर्तिभागः प्रसन्नः अस्ति । सा अवोचत्, यदा भारतं सफलं भवति तदा संसारः अधिकस्थिरः, समृद्धः, सुरक्षितः च भवति।

---

<u>प्रधानमन्त्री-ऊर्जासप्ताहः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना दक्षिणवर्तिनि गोवाराज्ये आयोजितस्य षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारत-ऊर्जा-सप्ताहस्य उद्घाटनं विहितम्। अस्मिन् अवसरे सः अवदत् यत्, भारतं ऊर्जाक्षेत्रस्य अवसराणाम् भूमिः अस्ति तथा च वैश्विकरूपेण पेट्रोलियम इत्यस्य इन्धनस्य उत्पादानां शीर्षपञ्चसु निर्यातकेषु अन्यतमम् अस्ति। सः अवदत् यत्, भारत-ऊर्जा-सप्ताहः ऊर्जाक्षेत्रे संवादस्य क्रियायाः च वैश्विक-मञ्चरूपेण द्रुतगत्या उद्भूतः अस्ति।

प्रधानमंत्रीः अवदत् यत् भारतं सम्प्रति शोधनक्षमतायाः दृष्ट्या विश्वे द्वितीयं स्थानं धारयति तथा च शीघ्रमेव विश्वे प्रथमस्थाने भविष्यति इति।

----------------------------------------------

<u>रक्षामंत्री-डीआरडीओ</u>

रक्षामन्त्री राजनाथसिंहः अद्य यूरोपीयसङ्घेन सह देशस्य वर्धमानसहभागित्वं पुनः दृढीकृतवान्। रक्षामन्त्री अद्य नवदेहली-नगरे यूरोपीयसङ्घस्य प्रतिनिधिसङ्घेन सह मेलनं कृतवान्। रक्षामन्त्री वैश्विकशान्तेः सुरक्षायाः च विषये देशस्य प्रतिबद्धतायाः विषये अपि अवधानं दत्तवान्। यूरोपीय-आयोगस्य उपाध्यक्षा काजा कल्लास् इत्येषा सुरक्षायाः रक्षायाः च सहभागित्वेषु हस्ताक्षरं महत्त्वपूर्णम् इति अमन्यत, येन उभयोः पक्षयोः मध्ये रक्षा-सहकारः सुदृढः भविष्यति इति सा उक्तवती।

----------------------------------------------

<u>राजनाथ-आयव्यय</u>

नवदिल्ल्याः संसदभवन-परिसरे संसदः आयव्यय-सत्रात् पूर्वं सर्वदलीय-सभा प्रचलति। रक्षामंत्री राजनाथसिंहः अस्य सभायाः अध्यक्षः अस्ति। राज्यसभायाः सदनाध्यक्षः जे. पी. नड्डाः, संसदीयकार्यमन्त्री किरेन रिजिजू, संसदीयकार्यराज्यमन्त्री अर्जुनराम मेघवालः, डा. एल. मुरुगन च सभायां उपस्थिताः सन्ति। काङ्ग्रेस-नेता जयराम रमेशः, डी. एम. के-नेता तिरुचि शिवः, तृणमूल-काङ्ग्रेस-नेता सागरिका घोषः, समाजवादी-दलस्य सांसदः रामगोपाल यादवः अपि उपस्थिताः सन्ति। संसदः आयव्यय-सत्रम् श्वः आरभ्य अप्रैल-मासस्य द्वितीय-दिनाङ्क-पर्यन्तं प्रचलति।

----------------------------------------------

<u>केरल- सबरीमला</u>

केरल-राज्ये विपक्षस्य युनाइटेड-डेमोक्रेटिक-फ़्रण्ट इत्यस्य द्वौ विधायकौ अद्य केरल-विधानसभायाः पुरतः विरोध-प्रदर्शनं कृतवन्तौ, सबरीमला-स्वर्ण-ग्रहण-प्रकरणस्य विषये

देवस्वोम इत्यस्य-मन्त्रिणः त्यागपत्रं याचितवन्तौ। विपक्षस्य नेता वी. डी. सतीशनः प्रकरणस्य अन्वेषणे संलग्नस्य विशेष-अन्वेषण-दलस्य (एस. आई. टि.) इत्यस्य कार्ये मुख्यमन्त्री-कार्यालयस्य हस्तक्षेपः आरोपितवान्। तेन घोषितं यत् विपक्षः स्वस्य विरोधप्रदर्शनं तीव्रतरं करिष्यति। मुख्यमन्त्री पिनरायी विजयन् इत्येषः विरोध प्रदर्शनम् अनुचितम् इति वर्णितवान् यत् सर्वकारस्य विरुद्धं नासीत्।

-----------------------------------------------

<u>भारत-यूएन</u>

भारतेन अद्य संयुक्तराष्ट्रसङ्घे पाकिस्तानं प्रति वाक्प्रहारः कृतः यतः पाकिस्तानदेशः सिंदूराभियानप्रकरणे मिथ्या-भ्रामकम् कथनं प्रसारयति। भारतस्य आन्तरिकविषयेषु, विशेषतः केन्द्रशासितप्रदेशस्य जम्मू-कश्मीरस्य विषये टिप्पणीं कर्तुं इस्लामाबादस्य अधिकारो नास्ति इति सः दृढीकृतवान्। संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि दृढप्रत्युत्तरे, संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः पी. हरीशः दृढतया उक्तवान् यत्, पाकिस्तानस्य राज्यनीतेः साधनरूपेण भयोत्पादनस्य निरन्तरप्रयोगं असहनीयम् अस्ति। श्री हरीशः पाकिस्तानस्य राजदूतस्य असीम इफ्तिखार अहमद इत्यस्य सुरक्षापरिषदि अन्ताराष्ट्रियविधिप्रशासनस्य पुनः दृढीकरणं-शान्तेः, न्यायस्य, बहुपक्षवादस्य च पुनरुद्धरणस्य मार्गे मुक्त-वादविवादस्य समये कृतानि वक्तव्यानि प्रत्युत्तरन् आसीत्। अस्मिन् अवसरे संयुक्तराष्ट्रसङ्घस्य महासचिवः एन्टोनियो गुटरेसः उक्तवान् यत् विश्वस्य अनेकेषु भागेषु विधिप्रशासनस्य स्थाने जङ्गलराजः इति प्रचलति।

।। इति वार्ताः ।।